## गवियुधिभ्यां स्थिरः। (९५/९६७)

[1]गवियुधिभ्याम् उत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो भवति। [2]गविष्ठिरः। युधिष्ठिरः। गोशब्दादहलन्तादपि एतस्मादेव [3]निपातनात् सप्तम्या अलुग् [4]भवति॥

## विकुशमिपरिभ्यः स्थलम्। (९६/३०८७)

वि कु शमि परि इत्येतेभ्यः [5]उत्तरस्य स्थलसकारस्य मूर्धन्यादेशो भवति। विष्ठलम्। [6]कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्॥

## अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः। (९७/२९१८)

अम्ब आम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्नि इत्येतेभ्यः उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति। अम्बष्ठः। आम्बष्ठः। [7]गोष्ठः। भूमिष्ठः। [8]सव्येष्ठः। अपष्ठः। द्विष्ठः। त्रिष्ठः। कुष्ठः। शेकुष्ठः। शङ्कुष्ठः। अङ्गुष्ठः। मञ्जिष्ठः। पुञ्जिष्ठः। परमेष्ठः। बर्हिष्ठः। दिविष्ठः। अग्निष्ठः।

[९४३] स्थास्थिन्स्थॄणामिति वक्तव्यम्। (म. भा. ३.४४८)

[9]सव्येष्ठाः। परमेष्ठी। [10]सव्येष्ठृसारथिः॥

## सुषामादिषु च। (९८/१०२२)

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति। शोभनं साम यस्यासौ सुषामा [11]ब्राह्मणः। दुष्षामा। निष्षामा। निष्षेधः। दुष्षेधः। सुशब्दस्य कर्मप्रवचनीयसञ्ज्ञकत्वान् निर्दुर्शब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयम्। 'सेधतेर्गतौ' (८.३.११३/२२७८) इति वा प्रतिषेध[12]बाधनार्थः। सुषन्धिः। दुष्षन्धिः। निष्षन्धिः। सुष्ठु। दुष्ठु। तिष्ठतेरुणादिष्वेतौ [13]व्युत्पाद्येते। 'गौरिषक्थः सञ्ज्ञायाम्' (ग.सू. १७९)। 'ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम्' (६.३.६३/१००१) इति पूर्वपदस्य ह्रस्वत्वम्। प्रतिष्णिका। प्रतिष्णाशब्दादयं कन् प्रत्ययः। जलाषाहम्। [14]नौषेचनम्। दुन्दुभिषेवणम्। 'एति सञ्ज्ञायामगात्' (ग. सू. १८०)। एकारपरस्य सकारस्य मूर्धन्यादेशः भवति इण्को[15]रुत्तरस्य अगकारात् परस्य सञ्ज्ञायां [16]विषये। हरिषेणः। [17]वारिषेणः। जानुषेणी। एति इति किम्? [18]हरिसक्थम्। सञ्ज्ञायाम् इति किम्? पृथ्वी सेना [19]यस्य स पृथुसेनो [20]राजा। अगात् इति [21]किम्? विष्वक्सेनः। इण्कोः इत्येव, सर्वसेनः। 'नक्षत्राद्वा' (ग. सू. १८१)।

---

1. गवि युधि इत्येताभ्याम् ब. क. इ. 2. स्थिर इति अजिरशिशिरस्फिरस्थविरखदिर इति किरच् प्रत्ययः इत्यधिकम् क. 3. वचनात् क. 4. भवति नास्ति ब. क. ह. 5. उत्तरस्य नास्ति इ. 6. ऋष्ठलम् क, कुष्ठलम् शमिष्ठलम् नास्ति इ. 7. गोष्ठम् ड. 8. सव्यष्ठः ह. 9. सव्येष्ठः इ. 10. सव्येष्टृ इ. 11. ब्राह्मणः नास्ति ब. इ. 12. बाधनार्थम् ब. 13. व्युत्पादितौ ब. 14. नौषेवणम् ब. इ. 15. उत्तरस्य नास्ति ब. क. 16. विषये नास्ति ब. इ. 17. परिषेणः जानुषेणः ब. ड. 18. हरिसिंहः ब. क, हरिसन्धिः इ. ह, हलिसक्थम् ड. 19. अस्य ब. क. 20. राजा नास्ति ब. इ. ह. 21. किम् नास्ति ब.